# Contents


1 pibare rAama rasam 2

2 khelati mama h.rdaye 3

3 cetaH shrI rAmam 4

4 bhaja re raghuvIram 5

# सदाशिवब्रह्मेन्द्र कीर्तनानि

## 1 pibare rAama rasam

## १. पिबरे राम रसम्

रागम्: यमुनाकल्याणि ताळम्: आदि

**पल्लवि**

पिबरे रामरसं रसने पिबरे राम रसम्

**चरणम्**

दूरीकृत पातक संसर्गं
पूरित नानाविध फल वर्गम् ॥ १ ॥

जनन मरण भय शोक विदूरं
सकल शास्त्र निगमागम सारम् ॥ २ ॥

परिपालित सरसिज गर्भाण्डं
परम पवित्री कृत पाषाण्डम् ॥ ३ ॥

शुद्ध परमहंसाश्रित गीतं
शुक शौनक कौशिक मुख पीतम् ॥ ४ ॥

◇ ◇ ◇ ◇ ◇

## 2 khelati mama h.rdaye

# २. खेलति मम हृदये

रागम्: अठाणा      ताळम्: आदि

### पल्लवि

खेलति मम हृदये रामः खेलति मम हृदये

### अनुपल्लवि

मोह महार्णव तारक कारी
रागद्वेष मुखासुर मारी **चरणम्**

शान्ति विदेहसुता सहचारी

दहरायोध्या नगर विहारी

परमहंस साम्राज्योद्धारी
सत्य ज्ञानानन्द शरीरी

◇ ◇ ◇ ◇ ◇

## 3    cetaH shrI rAmam

# ३. चेतः श्री रामम्

राहम्: सुरट्टि        ताळम्: आदि

**पल्लवि**

चेतः श्री रामं चिन्तय जीमूत श्यामम्

**चरणम्**

अङ्गीकृत तुम्बुरु सङ्गीतं
हनुमद् गवय गवाक्ष समेतम् ॥ १ ॥

नवरत्न स्थपित कोटीरं
नव तुलसीदळ कल्पित हारम् ॥ २॥

परमहंस हृद् गोपुर दीपं
चरण दलित मुनि तरुणी शापम् ॥ ३ ॥

◇ ◇ ◇ ◇ ◇

# 4 bhaja re raghuvIram

# ४. भज रे रघुवीरम्

रागम्: कल्याणि ताळम्; मिश्र चापु

## पल्लवि

भज रे रघुवीरं मानस भज रे बहु धीरम्

## अनुपल्लवि

अम्बुद डिंभ विडम्बन गात्रं
अम्बुद वाहन नन्दन दात्रम्

## चरणम्

कुशिक सुतार्पित कार्मुक वेदं

वशि हृदयाम्बुज भास्कर पादम्

कुण्डल मण्दन मण्डित कर्णं
कुण्डलि मञ्जकमद्भुत वर्णम् ॥ १ ॥

दण्डित सुन्दसुतादिक वीरं

मण्डित मनुकुलमाश्रय शौरिम्

परमहंसमखिलागम वेद्यं
परम वेदमकुटीप्रतिपाद्यम् ॥ २॥

◇ ◇ ◇ ◇ ◇